National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 105-107
© 2026 NJHSR
www.sanskritarticle.com

**Sanchita Chakraborty**
Ph.D. Department of Sanskrit,
Calcutta University,
Kolkata, West Bengal

**Correspondence:**
**Sanchita Chakraborty**
Ph.D. Department of Sanskrit,
Calcutta University,
Kolkata, West Bengal

# लघुत्रय्यां बृहत्त्रय्यां गुणपरिमानविचारसमीक्षणम्

**Sanchita Chakraborty**

**सारांशः-** काव्यं द्विविधम् श्रव्यं दृश्यञ्च। श्रव्ये महाकाव्यानां दृश्ये च नाटकादीनाम् अवसर आलङ्कारिकैर्निर्णीयते। श्रव्ये महाकाव्यचर्चा प्रस्तूयते। ध्रुपदीसाहित्यागारे अश्वघोषादित आरभ्य उत्तरकालिकचर्चा आधुनिकस्तरपर्यन्तं सञ्चरति। प्राचीनमध्यार्वाचीनसंस्कृतसाहित्यागारे कवीनां कृतयः संवर्धन्ते। एतेषु समुपलब्धेषु महाकाव्येषु वरेण्यानां यथा गणनं तथैव तदधीनस्थानां महाकवीनां विन्यासः सुललित एव। नात्र संशयो वितर्को वा महाकवेः कालिदासस्य प्राथम्येन स्थाननिर्णये यत्रेतरेषां द्वितीयादित्वेन भावनं सहनीयमेव। प्रवहमानासु एतासु स्रोतस्विनीषु पुनश्चर्चा सेविता लघुत्रयी-बृहत्त्रयी-द्वितयपक्षावलम्बनस्तुत्या। अत्र प्राचीनस्तरे विद्यामानासु कविकृतिषु पुनरवान्तरभेद- वशात् त्रयीपर्यायाश्चिन्तिताः स्युः। यद्यपि त्रयीशब्देन वेदो लक्षितो भवति, तथापि लघु-बृहच्छब्द-परिवारसंवृततया कैश्चित् अलङ्कारप्रवीणैस्तदन्तर्वर्त्तित्वेन नवीना चर्चा चलिता।

सा चर्चा सार्थक्यं समाप्नोति यदा लघुमध्ये बृहन्मध्ये च परिगणितानां महाकाव्यानां सम्यक्तया विद्यानुशीलने निर्धारणं विद्यते नाम। कालिदासपर्यायः अतिसमृद्धकालः, तदुत्तरवर्ती पर्यायः बहुलतया शास्त्रकाव्यवैदग्ध्यादिवासिततया कृत्रिमाडम्बरमध्ये परिगणितो भारविमाघादिप्रणीतमहाकाव्यानां बहिरङ्गमण्डनकलासंशोधितत्वेन। एवं साहित्यचर्चायां सुवर्णयुगस्य तथा तदुत्तरवर्तिनां कवीनां कृत्रिमपर्याये संसाधितत्वेन सहजानुत्पादकत्वात् कथञ्चित् अधःपर्यायवाचिनः समासादनमित्युभयमेव समासाद्य त्रयीत्वविवेचना।

स्मर्त्तव्यमेतद्, कालिदासीयकाव्यचर्चायां द्वे महाकाव्ये खण्डकाव्यं केवलं चेति त्रितयम्, अन्यतः भारव्यादीनां महाकवीनां महाकाव्यत्रयं यथाक्रमं किरातार्जुनीयम् (भारविप्रणीतम्), शिशुपालवधम् (माघप्रणीतम्), नैषधचरितम् (श्रीहर्षविरचितम्) उपगृह्य चर्चा चलिता। संस्कृतसाहित्यसमालोचकैः 'भारवेर्भारवेरिव' इत्यादिवचःशतैः कृत्रिमरचनायामनुरागादिदर्शनपराणां गणनायां लघुबृहद्भावना प्रशस्यतामापन्ना। अत्रैवंविधा विचारणा कार्या यत् लघुत्वबृहत्त्वगणना कं पक्षमवलम्ब्य घटते- गुणनिर्णयः, संख्यानिर्णयो वेति।नाद्यः संख्यान्यूनत्त्वात् कालिदासीयकाव्य- स्रोतोधारायाः प्रतिभावलेन मर्मस्पर्शिणीत्वम्, अन्यत्र भारव्यादिकाव्यस्रोतोवृत्तिः कृत्रिमत्वमापन्नो- त्पाद्या च संख्यानिर्णयेन्न प्रसक्तत्वात्। एवमुत्तरपक्षः श्रेयान्। तथाहि संख्याविचारे कालिदासीयकाव्यस्थले महाकाव्यद्वयस्य रघुवंशकुमारसम्भवाख्यस्य मेघदूतमित्याख्यस्य खण्डकाव्यस्य सत्त्वात् पूर्णतया महाकाव्यत्रय-स्यानुपस्थितेः, अन्यत्र त्रयाणां महाकवीनाम् एकैकं महाकाव्यं गृहीत्वा महाकाव्यधारा अव्याहतेति कृत्वा लघुत्वबृहत्त्वसंसारः समीचीन एव।

**प्रस्तावना-** 'अपारे काव्यसंसारे कविरेक प्रजापतिः' इति भावना काव्यजगन्निरतरां स्पृशति। काव्यं किल कवेर्भाव इति व्याहारात् कृ-धातोः इन्-प्रत्ययेन कवि-शब्दनिष्पन्नेन तदुत्तरं भावार्थे ष्यञि अनुवन्धलोपे पूर्वस्वरवृद्धौ काव्यशब्दस्य कवित्वेन भानात् सार्थक्यं सङ्गच्छते। कविशब्दस्य कथने तात्पर्यसत्त्वात्, कथनं किल त्रिकालदर्शित्वेनाविसंवादित्वात् शाश्वतमर्यादामासाद्यते।

एवं कवयः शाश्वतद्रष्टारः। अन्यत्र ऋषिशब्दो मन्त्रद्रष्टृत्वेन प्रयुज्यते। सनातने शास्त्रे मन्त्राणां शाश्वतेन व्यवहारात् तद्द्रष्टारः सुतरां तद्भावापन्नाः भवेयुः इति ऋषेः त्रिकालदर्शित्वं गद्यते। एवम् ऋषिकविशब्दयोः समार्थपरत्वेऽपि रसिकानां प्रेक्षायां कविषु यथा द्रष्टृत्वं वक्तृत्वमित्युभयमेव वर्धते, ऋषिषु केवलदृष्टृत्वस्य भानात् कथञ्चिद्विचारचर्चायां कवेरौन्नत्यं स्थानं प्रदीयते। कवेर्भावः काव्यम्। 'कु' इति धातोः कथनार्थकत्वेन यः कौति आन्तरभावान्, परिनिष्पादयति स कविः। निष्पादनं न्यूनं शब्दार्थद्वारा। एतदर्थं चिन्तितमालङ्कारिकैः 'शब्दार्थौ सहितौ काव्यम्' इति। वर्णराश्यात्मकः शब्दस्तादृशानर्थान् विदधाति येन पाठकानां सहृदयानां मनोमुकुरे लोकातिशयचत्मकारिकता प्रतिभाति। अतः कवेः मनोरञ्जनी वृत्तिराद्यस्थानमधिकुरुते। एषा वृत्तिः प्रतिभापरा अनुशीलनसाध्या च। प्रतिभा किल नवनवोन्मेषशालिनी बुद्धिर्नाम। अनुशीलनपरा क्लेशसाध्या च। आद्या केवलं तं जनं भजते यत्र मूर्तिमयी वाणी स्वयमधितिष्ठते, लेखनीमुखेनान्तर्भावः प्रकट्यते। एषा सहजलभ्या मनोरमा च। अनुशीलनपरायणं काव्यचर्चायां क्लेशदायकत्वं सूचयति नाम। आद्या चर्चा किल वाल्मीकि-कालिदासप्रभृतिमवलम्ब्य घटते, इतरपक्षे भारविमाघादयः स्तूयन्ते।

**विषयसारः-** महाकाव्यसंसारे लघुत्वबृहत्त्वसंज्ञाचर्चा। प्रस्तुते लघुत्रय्यां कालिदासीयानां महाकाव्यादेः विन्यासादिचर्चा। तथाहि ऊनविंशसर्गात्मकं 'रघुवंशम्' नाम महाकाव्यम्, अष्टमसर्गात्मकं 'कुमारसम्भवम्' नाम महाकाव्यम्, पूर्वोत्तरभेदेन 'मेघदूतम्' नाम खण्डकाव्य- ञ्चालापमध्ये सेव्यमानत्वेन ग्राह्यम्। वस्तुगत्या विचरणं कवीनां काव्यजगति स्वीयप्रतिभानिदर्शनवलेन। प्रतिभा जन्मलग्ना काव्यानुशीलनपरा च। मुख्या प्रथमैव, अपरा साध्यैव। स्वाभाविकी यत्र सहृदयहृदयवेद्यानां रसचमत्कारिता स्वयं वरीवर्त्तते, साध्यत्वनामापरपक्षे पूर्ववद्रसोच्छलतान्यूनत्वात् काव्यसौधमध्ये विचरणं न कथमपि हेयपक्षे नेयम्, उत्कर्षसारे अन्तर्माधुर्येण वर्धयते, रुचिभिन्नत्वेन विद्यमानात्। एतेनान्तर्माधुर्यं परिवेशयन्तः कवयो नाधिक्येन विद्यमानास्तिष्ठन्ति। 'पुरा कवीनां गणनाप्रसङ्गे कनीष्ठिकाऽधिष्ठितकालिदासः' इति काव्यरसिकानां विवेकध्वनिः कर्णेषु सदा सुधाधारां स्रवति। मधुरकोमलकान्तपदावली काले काले रसिकचित्तानि समभावरसैः संवर्धमाना आस्ते। एषा भावना तत्कालिकर्द्धिमार्गं संसेव्यमाना तिष्ठति, गौरवकथाऽप्रतिहतगत्या राजमाना सुनिर्दिष्टकालावधिमतिक्रामति। चित्तपक्षी अनन्ताकाशपा-रावारं सरलशोभनपक्षसञ्चालनेनातिक्रामन् अतिमोहमयतां भजमानः समस्ति। किं माधुर्यं रसोर्मिचञ्चल- तारसास्वादनधीरगम्भीरभावेषु, किं सारल्यं शब्दार्थद्वन्द्वोच्छवासविलासादिक्षेत्रेषु, किं गाम्भीर्यं नियतसंवेदनशीलमर्मरध्वनिप्रसूताम्बोधौ, किं नामालक्षितं कठिनाव-रणभेदिसुललितछन्दोमूर्धन्यसे- वायाम् इत्यादिप्रभाविकीर्णः काव्य-संसारः स्वभावजप्रतिभातरङ्गसेवितपुलिने।

काव्यानुशीलपरत्वक्षेत्रे कर्मजन्यत्वविलासे न प्रथमगता सुषमा स्वानुभवचरा। कविभावना स्वयमन्तर्दिगन्तसञ्चारिणीं वृत्तिमपहाय बहिर्जगति सञ्चरमाणान् शब्दान् तदीयार्थान् अस्वीकृत्यातिभीषणां गम्भीरां चर्चां साधयति। शब्दार्थद्वन्द्वे कविभावनां निष्पीड्योत्तर-वर्त्तिनः कवयो भारविप्रभृतयः कालिदासीयां रीतिं निन्दन्ति, सर्ववरेण्यं रघुवंशं नाम महाकाव्यं विस्तुवन्ति 'रघुरपि काव्यं तदपि च सेव्यं। तस्यापि टीका सापि च पाठ्या'॥ इति वचोभङ्ग्या। कृत्रिमाडम्बरयुक्तगुरुभारो महाकाव्यरचनाया वलिष्ठः पदक्षेपो यत्र शास्त्रकाव्यस्य वैदग्ध्यं भाषाया ऐश्वर्यं वर्णनायां वैभवबाहुल्यं, भावगाम्भीर्यं, बहिरातिशय्यम् इत्यादिसम्पत्समावेशेन, पाण्डित्यस्य साधारणी प्रचेष्टा प्रदर्शिता। बहिरङ्गमण्डनकलायां तथा शब्दार्थविहितभयङ्करायासजन्यनिगूढे समासीनं साहित्यरचनं पाठकक्लेशसञ्चारि। भारवि-माघ-श्रीहर्षप्रभृतीनां विरचितेषु काव्येषु बहिरङ्गातिशय्यं सततं सन्दृष्टम्। समासतः किरातार्जुनीय-शिशुपालवध-नैषधचरित-महाकाव्येषु सर्वथा महाकाव्यवैशिष्ट्यानि समाश्रितानि। एवमालङ्कारिकदृष्ट्या एतानि समगुणसम्पन्नानि। कालिदासीयकृतिषु रघुवंश-कुमारसम्भवाख्यमहाकाव्यद्वयं तथा मेघदूतं नाम खण्डकाव्यम् इत्येतत्त्रयं न समगुणसम्पन्नमिति कृत्वा न्यूनता सेविता, येन लघुत्रयी नाम समाख्या आपातदृष्ट्या संयुज्यते।

नात्र मतिः सञ्चारणीया यत् कालिदासीयभावनायां महाकाव्य-मार्गसञ्चरणं न स्तब्धीभूतं, तन्महाभागानां सदिच्छामात्रस्य विचरणाभावात्। यन्मध्ये प्रतिभावीजं स्वयं समस्ति, तत्र तदभावकल्पना मूढेषु मर्मरध्वनिमासादिता। कालिदासीया रीतिर-नन्या। द्व्यधिकमहाकाव्यरचनं केवलखण्डकाव्यसेवनापेक्षया वैचित्र्य-मात्रमासादितञ्चेन्न प्रतिभादौर्बल्यं कल्पनीयम्।

**निष्कर्षः-** आस्तां तावत्तादृशी विचारणा। भाषाचर्चायां संस्कृतसाहित्यं स्वशैलीवशेनाशेषविशेष- चमत्कारितायाः समुच्छ्र-यणात् असाधारण-त्वमाद्रियते किल। गद्य-पद्य-तदुभयात्मकभेदेन सकलरसिकहृदयानि निरतिशयं विवर्धमानानि काव्यानि समतिशेरते। काव्यसंसारः सततभेदवशेन मूलतः रसास्वादनपरतया सर्वत्र चमत्कारितामाश्रयन् अलौकिकं महिमानं ख्यापयति। अतः कविरनन्यजन एव। काव्यं यथा सृज्यते, ततः रचयितृभेद-वशेनमानवैभिन्न्यमायाति नूनम्। कदापि सुवर्णमयं युगं, अनन्तरं भारविमाघादिविरचितेषु महाकाव्येषु साहित्यिकधारणायामालङ्का-रिकदृष्टि- निवन्धनेन कथञ्चिदपक्षीय-मानयुगसौन्दर्येण विद्यमानत्वम्,

ततः क्षयमात्रस्य काव्यचर्चायां प्रसङ्गत्वमिति निर्णये सुवर्णमय-मध्यमपर्याय-धर्मपर्यायाः लक्षिता दृश्यन्ते। काव्यस्य नानाविभागा दृश्यन्ते यत्र बृहल्लघुशब्दव्यवहारो दृष्टो संस्कृतमहाकाव्योदानं व्यतिरिच्य। महाकाव्येषु असौ बृहल्लघुशब्दव्यवहारः ईशवीय-पञ्चदशशतकादूर्ध्वं नूनं घटते। इतरेषु जैन-व्याकारणादिशास्त्रान्तरेषु उभयविधसंज्ञायाः प्रचलितत्वेन कैश्चन संस्कृतसाहित्यगता-लंकारचर्चाप्रवीणैः संज्ञाद्वयं व्यवहृतं सुवर्ण-मध्यम-युगद्वयमङ्गीकृत्य।

अत्रेदं सम्प्रधार्यम्। युगद्वये प्राचीन-मध्यमकालिककृतिसाकल्ये मौलिकं पार्थक्यं यथा विद्यते, तथैव कालिदासीयेन महाकाव्यद्वितयेन साकं भारवि-माघ-श्रीहर्षगतमहाकाव्यानां त्रयाणां विचारः कृतः इति सर्वथाऽसंसनीया चिन्ता कलुषीक्रियते काव्यसमालोचकमतम्। तथाहि लघुत्रयीमध्ये 'रघुवंशम्' 'कुमारसम्भवम्' इति महाकाव्यद्वयं खण्डकाव्यमपरं 'मेघदूतं' इति पूर्णाङ्गतया महाकाव्यत्रयानापत्तेः लघुत्वं संख्यागतमानविवक्षया; अपरतश्च संस्कृतसाहित्यमूर्धन्यानां भारवि-माघ-श्रीहर्षादीनां प्रशंसनीयानि त्रीणि महाकाव्यानि इत्यत्र बृहत्त्रयीत्वम्। महाकाव्यसंज्ञायां कालिदासीयकृतिद्वयं सावलील-वाक्प्रवाहार्यवोधस्वाच्छन्द्यादिसारस्वतमाधुर्योपपन्नं नूनमतिशेते मध्ययुगवासितमहाकाव्य- त्रयगतधारणादिकमुपलक्ष्य। तथापि न मानगतविचारेण, किन्तु महाकाव्यलक्षणविचारेण त्रितयस्य युग्मतः ग्रहणमिति बृहत्त्रयीमध्ये सञ्चारः सङ्गतिमापद्यते। एतेन मानगतो विचारः आपस्तः, लक्षणप्राप्ता कथञ्चित् पारिपाट्यं सूचितमिति कृत्वा लघुत्रय्यास्तथा बृहत्त्रय्याः विवरणमुखेन आलोचनं प्रस्तूयते।

अन्ते कविमुख्यानां कालिदासानां काव्यसम्पदादिकमाधारीकृत्य सश्रद्धमेतद्वक्तुं पार्यते लघुत्व- चिन्ता कालिदासीयकाव्यविचारे नियतमषोढा, किन्तु संख्याविचारे कथञ्चित् ह्रस्वीकृता। एतादृश-समालोचकवाक्यसत्त्वेऽपि संख्यागतविचारेण न्यूनत्वं कालिदासस्येति भावनायाः यथार्थत्वेन न काचन क्षतिरिति।

**Bibliography**


- Gupta. Dikshit. Nitiśastra. Kolkata: West Bengal State Book Board, 2007.
- Jani, A.N. "A critical study of Sriharṣa's Naiṣadhiyacarita." M.S. University of Baroda Research Series-2. Baroda (now Vadodara): Oriental institute, 1957.
- Kālidāsa. Kumārasambhava. Ed. Suryakanta. New Delhi: Sahitya Akademi, 1962.
- Kālidāsa. Meghaduta. Ed. & Eng. trans. M.R. Kale.Bombay (now Mumbai): Booksellers' Publishing Co, n.d. 6th ed.
- Kālidāsa. Raghuvamsa. Ed. Rewa Prasada Dwivedi. New Delhi: Sahitya Akademi, 1993. Motilal Banarsidass, 1983 rpt. ed. (4th revised and enlarged edition Delhi 1966).